महाकविश्रीजयदेवविरचितः

चन्द्रालोकः

(मूलकारिकामात्रम्)

सम्पादकः

सुशान्त पौडेल

विषय सूची

प्रथमो मयूखः ०१

द्वितीयो मयूखः.. ०३

तृतीयो मयूखः ०८

चतुर्थो मयूखः.. ०९

पञ्चमो मयूखः ११

षष्ठो मयूखः.. २३

सप्तमो मयूखः २६

अष्टमो मयूखः.. २८

नवमो मयूखः.. २९

दशमो मयूखः ३१

कारिकाणामकारादिसूची ३२

प्रस्तुतेऽस्मिन् ग्रन्थे १९९५ तमे वैक्रमाब्दे **‘चौखम्बा संस्कृत सीरीज़ आफिस’** इति नामकाद् मुद्रणालयात् **‘चौखम्बासंस्कृत-ग्रन्थमाला’** इति ग्रन्थमालायां **श्रीअनन्तरामशास्त्रि**भिः सुसम्पाद्य **‘श्रीगागाभट्टकृतराकागमव्याख्यासहितः चन्द्रालोकः’** इति नाम्ना प्रकाशिताद् ग्रन्थाद् मूलकारिकाः उद्धृताः सन्ति ।

महाकविश्रीजयदेवविरचितः

चन्द्रालोकः

— प्रथमो मयूखः —

उच्चैरस्यति मन्दतामरसतां जाग्रत्कलङ्कैरव-
ध्वंसं हस्तयते च या सुमनसामुल्लासिनी मानसे।
दुष्टोद्यन्मदनाशनार्चिरमला लोकत्रयीदर्शिका
सा नेत्रत्रितयीव खण्डपरशोर्वाग्देवता दीव्यतु॥ १॥

हंहो चिन्मयचित्तचन्द्रमणयः संवर्धयध्वं रसान्
रे रे स्वैरिणि निर्विचारकविते मा स्म प्रकाशीभवः।
उल्लासाय विचारवीचिनिचयालङ्कारवारांनिधे-
श्चन्द्रालोकमयं स्वयं वितनुते पीयूषवर्षः कृती॥ २॥

युक्त्यास्वाद्यलसद्रसैकवसतिः साहित्यसारस्वत-
क्षीराम्भोधिरगाधतामुपदधत् सेव्यः समाश्रीयताम्।
श्रीरस्मादुपदेशकौशलमयं पीयूषमस्माज्जग-
ज्जाग्रद्भासुरपद्मकेसरयशःशीतांशुरस्माद् बुधाः॥ ३॥

तं पूर्वाचार्यसूर्योक्तिज्योतिःस्तोमोद्गमं स्तुमः।
यं संश्रित्य प्रकाशन्ते मद्गुणत्रसरेणवः॥ ४॥

नाशङ्कनीयं पूर्वेषां मतमेतेन दूष्यते।
किन्तु चक्षुर्मृगाक्षीणां कज्जलेनैव भूष्यते॥ ५॥

प्रतिमैव श्रुताभ्याससहिता कवितां प्रति।
हेतुर्मृदम्बुसम्बद्धा बीजपङ्क्तिर्लतामिव॥ ६॥

निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।
सालङ्काररसाऽनेकवृत्तिर्वाक् काव्यनामभाक्॥ ७॥

अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।

असौ न मन्यते कस्मादनुष्णमनलं कृती ॥ ८ ॥
विभक्त्युत्पत्तये योग्यः शास्त्रीयः शब्द इष्यते ।
रूढयौगिकतन्मिश्रैः प्रभेदैः स पुनस्त्रिधा ॥ ९ ॥
अव्यक्तयोगनिर्योगयोगाभासैस्त्रिधाऽऽदिमः ।
ते च वृक्षादिभूवादिमण्डपाद्या यथाक्रमम् ॥ १० ॥
शुद्धतन्मूलसंभिन्नप्रभेदैर्यौगिकस्त्रिधा ।
ते च भ्रान्तिस्फुरत्कान्तिकौन्तेयादिस्वरूपिणः ॥ ११ ॥
तन्मिश्रोऽन्योन्यसामान्यविशेषपरिवर्तनात् ।
नीरधिः पङ्कजं सौधं सागरो भूरुहः शशी ॥ १२ ॥
क्षीरनीरधिराकाशपङ्कजं तेन सिद्ध्यति ।
विभक्त्यन्तं पदं वाक्यं तद्व्यूहोऽर्थसमाप्तितः ॥ १३ ॥
युक्तार्थानां तां च विना खण्डवाक्यं स इष्यते ।
वाक्यं च खण्डवाक्यं च पदमेकमपि क्वचित् ॥ १४ ॥
धूमवत्त्वादिति यथा देवेत्यामन्त्रणं तथा ।
वाक्यान्येकार्थविश्रान्तान्याहुर्वाक्यकदम्बकम् ॥ १५ ॥
महादेवः सत्रप्रमुखमखविद्यैकचतुरः
सुमित्रातद्भक्तिप्रणिहितमतिर्यस्य पितरौ ।
अनेनाऽसावाद्यः सुकविजयदेवेन रचिते
चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः ॥ १६ ॥

इति श्रीपीयूषवर्षपण्डितजयदेवकृते चन्द्रालोकालङ्कारे
वाग्विचारो नाम प्रथमो मयूखः ॥

— द्वितीयो मयूखः —

स्याच्चेतो विशता येन सक्षता रमणीयता।
शब्देऽर्थे च कृतोन्मेषं दोषमुद्घोषयन्ति तम्॥ १॥
भवेच्छ्रुतिकटुर्वर्णः श्रवणोद्वेजने पटुः।
संविद्रते व्याकरणविरुद्धं च्युतसंस्कृति॥ २॥
अप्रयुक्तं दैवतादौ शब्दे पुंल्लिङ्गतादिकम्।
असमर्थं तु हन्त्यादेः प्रयोगो गमनादिषु॥ ३॥
स हन्ति हन्त कान्तारे कान्तः कुटिलकुन्तलः।
निहतार्थं लोहितादौ शोणितादिप्रयोगतः॥ ४॥
व्यनक्त्यनुचितार्थं यत्पदमाहुस्तदेव तत्।
इयमद्भुतशाख्यग्रकेलिकौतुकवानरी॥ ५॥
निरर्थकं तु हीत्यादि पूरणैकप्रयोजनम्।
अर्थे विदधतीत्यादौ दधदाद्यमवाचकम्॥ ६॥
धत्ते नभस्तलं भास्वानरुणं तरुणैः करैः।
एकाक्षरं विना भूभ्रूक्ष्मादिकं खतलादिवत्॥ ७॥
अश्लीलं त्रिविधं व्रीडाजुगुप्साऽमङ्गलात्मना।
आह्लादसाधनं वायुः कान्तानाशे भवेत्कथम्॥ ८॥
स्याद् द्व्यर्थमिह सन्दिग्धं नद्यां यान्त पतत्रिणः।
स्यादप्रतीतं शास्त्रैकगम्यं वीताऽनुमादिवत्॥ ९॥
शिथिलं शयने लिल्ये मच्चितं ते शशिश्रियि।
मस्तपिष्टकटीलोष्ठगल्लादि ग्राम्यमुच्यते॥ १०॥
नेयार्थं लक्षणाऽत्यन्तप्रसरादमनोहरम्।
हिमांशोर्हारधिक्कारजागरे यामिकाः कराः॥ ११॥

क्लिष्टमर्थो यदीयोऽर्थश्रेणिनिःश्रेणिमृच्छति ।
हरिप्रियापितृवधूप्रवाहप्रतिमं वचः ॥ १२ ॥
अविमृष्टविधेयांशः समासपिहिते विधौ ।
विशन्ति विशिखप्रायकटाक्षाः कामिनां हृदि ॥ १३ ॥
अपराधीन इत्यादि विरुद्धमतिकृन्मतम् ।
अन्यसङ्गतमुत्तुङ्गहारशोभिपयोधरा ॥ १४ ॥
रसाद्यनुचिते वर्णे प्रतिकूलाक्षरं विदुः ।
न मामङ्गद जानासि रावणं रणदारुणम् ॥ १५ ॥
यस्मिन्नुपहतो लुप्तो विसर्ग इति तत्तथा ।
कुसन्धि पटवागच्छ विसन्धि नृपती इमौ ॥ १६ ॥
हतवृत्तमनुक्तोऽपि छन्दोदोसश्चकास्ति चेत् ।
विशाललोचने पश्याम्बरं तारातरङ्गितम् ॥ १७ ॥
न्यूनं त्वत्खड्गसम्भूतयशःपुष्पं नभस्तलम् ।
अधिकं भवतः शत्रून् दशत्यसिलताफणी ॥ १८ ॥
कथितं पुनरुक्ता वाक् श्यामाब्जश्यामलोचना ।
विकृतं दूरविकृतैरैयरुः कुञ्जराः पुरम् ॥ १९ ॥
पतत्प्रकर्षं त्यक्तानुप्रासादित्वे यथोत्तरम् ।
गम्भीरारम्भदम्भोलिपाणिरेष समागतः ॥ २० ॥
समाप्तपुनरात्तं स्यादेष पीयूषभाजनम् ।
नेत्रानन्दी तुषारांशुरुदेत्यम्बुधिबान्धवः ॥ २१ ॥
अर्धान्तरपदापेक्षि क्रीडानृत्येषु सस्मितम् ।
मोघारम्भं स्तुमः शम्भुमर्धरम्भोरुविग्रहम् ॥ २२ ॥
अभवन्मतयोगः स्यान्न चेदभिमताऽन्वयः ।
येन बद्धोऽम्बुधिर्यस्य रामस्यानुचरा वयम् ॥ २३ ॥

द्विषां सम्पदमाच्छिद्य यः शूरान् समपूरयत् ।
अस्थानस्थसमासं न विद्वज्जनमनोरमम् ॥ २४ ॥
मिथः पृथग्वाक्यपदैः सङ्कीर्णं यत्तदेव तत् ।
वक्त्रेण भ्राजते रात्रिः कान्ता चन्द्रेण राजते ॥ २५ ॥
ब्रह्माण्डं त्वद्यशःपूरगर्भितं भूमिभूषण ।
आकर्णय पयःपूर्णसुवर्णकलशायते ॥ २६ ॥
भग्नप्रक्रममारब्धशब्दनिर्वाहहीनता ।
अक्रमः कृष्ण पूज्यन्ते त्वामनाराध्य देवताः ॥ २७ ॥
अमतार्थान्तरं मुख्येऽमुख्येनार्थे विरोधकृत् ।
त्यक्तहारमुरः कृत्वा शोकेनालिङ्गिताऽङ्गना ॥ २८ ॥
अपुष्टोऽर्थो विशेष्ये चेन्न विशेषो विशेषणात् ।
विशन्ति हृदयं कान्ताकटाक्षाः खञ्जनत्विषः ॥ २९ ॥
कष्टः स्पष्टावबोधार्थमक्षमो वाच्यसन्निभः ।
व्याहतश्चेद्विरोधः स्यान्मिथः पूर्वापरार्थयोः ॥ ३० ॥
सहस्रपत्रामित्रं ते वक्त्रं केनोपमीयते ।
कुतस्तस्योपमा यस्य पुनरुक्तः सुधाकरः ॥ ३१ ॥
दुष्क्रमग्रामसन्दिग्धास्त्रयो दोषाः क्रमादमी ।
त्वद्भक्तः कृष्ण गच्छेयं नरकं स्वर्गमेव वा ॥ ३२ ॥
एकं मे चुम्बनं देहि तव दास्यामि कञ्चुकम् ।
ब्रूत किं सेव्यतां चन्द्रमुखीचन्द्रकिरीटयोः ॥ ३३ ॥
अनौचित्यं कीर्तिलतां तरङ्गयति यः सदा ।
प्रसिद्ध्या विद्यया वापि विरुद्धं द्विविधं मतम् ॥ ३४ ॥
न्यस्तेयं पश्य कन्दर्पप्रतापधवलद्युतिः ।
केतकी शिखरे शम्भोर्धत्ते चन्द्रकलातुलाम् ॥ ३५ ॥

सामान्यपरिवृत्तिः स्यात्कुण्डलच्छविविग्रहा।
विशेषपरिवृत्तिः स्याद्वनिता मम चेतसि॥ ३६॥
द्वौ स्तः सहचराऽचारुविरुद्धान्योन्यसङ्गती।
ध्वाङ्क्षाः सन्तश्च तनयं स्वं परं वा न जानते॥ ३७॥
सरोजनेत्र पुत्रस्य मुखेन्दुमवलोकय।
पालयिष्यति ते गोत्रमसौ नरपुरन्दरः॥ ३८॥
पदे पदांशे वाक्यांशे वाक्ये वाक्यकदम्बके।
यथावकाशमभ्यूहेद्दोषान् शब्दांशसंश्रयान्॥ ३९॥
दोषमापतितं स्वान्ते प्रसरन्तं विशृङ्खलम्।
निवारयति यस्त्रेधा दोषाङ्कुशमुशन्ति तम्॥ ४०॥
दोषे गुणत्वं तनुते दोषत्वं वा निरस्यति।
भवन्तमथवा दोषं नयत्यत्याज्यतामसौ॥ ४१॥
मुखं चन्द्रश्रियं धत्ते श्वेतश्मश्रुकराङ्कुरैः।
अत्र हास्यरसोद्देशे ग्राम्यत्वं गुणतां गतम्॥ ४२॥
तव दुग्धाब्धिसम्भूतेः कथं जाता कलङ्किता।
कवीनां समयाद्विद्याद्विरुद्धोऽदोषतां गतः॥ ४३॥
दधार गौरी हृदये देवं हि-मकराङ्कितम्।
अत्र श्लेषोदयान्नैव त्याज्यं हीति निरर्थकम्॥ ४४॥
महादेवः सत्रप्रमुखमखविद्यैकचतुरः
सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ।
द्वितीयस्तेनासौ सुकविजयदेवेन रचिते
चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः॥ ४५॥

इति श्रीपीयूषवर्षपण्डितजयदेवकृते चन्द्रालोकालङ्कारे
दोषविचारो नाम द्वितीयो मयूखः॥

— तृतीयो मयूखः —

अल्पाक्षरा विचित्रार्थख्यातिरक्षरसंहतिः ।
उषाकान्तेनाऽनुगतः शूरः शौरिरयं पुनः ॥ १ ॥
शोभा ख्यातोऽपि यद्दोषो गुणकीर्त्या निषिध्यते ।
मृषा निन्दन्ति संसारं कंसारिर्यत्र पूज्यते ॥ २ ॥
अभिमानो विचारश्चेदूहितार्थनिषेधकृत् ।
इन्दुर्यदि कथं तीव्रः सूर्यो यदि कथं निशि ॥ ३ ॥
हेतुस्त्यक्त्वा बहूनर्थान् यत्रैकस्यावधारणम् ।
नेन्दुर्नार्कोऽयमौर्वाग्निः सागरादुत्थितो दहन् ॥ ४ ॥
प्रतिषेधः प्रसिद्धानां कारणानामनादरः ।
न युद्धेन भ्रुवोः स्पन्देनैव वीरा निवारिताः ॥ ५ ॥
निरुक्तं स्यान्निर्वचनं नाम्नः सत्यं तथाऽनृतम् ।
ईदृशैश्चरितै राजन् सत्यं दोषाकरो भवान् ॥ ६ ॥
स्यान्मिथ्याध्यवसायश्चेदसती साध्यसाधने ।
चन्द्रांशुसूत्रग्रथितां नभःपुष्पस्रजं वह ॥ ७ ॥
सिद्धिः ख्यातेषु चेन्नाम कीर्त्यते तुल्यतोक्तये ।
युवामेवेह विख्यातौ त्वं बलैर्जलधिर्जलैः ॥ ८ ॥
युक्तिर्विशेषसिद्धिश्चेद्विचित्रार्थान्तरान्वयात् ।
नवस्त्वं नीरदः कोऽपि स्वर्णैर्वर्षसि यन्मुहुः ॥ ९ ॥
कार्यं फलोपलम्भश्चेद् व्यापाराद्वस्तुनोऽथ वा ।
असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवाम् ॥ १० ॥
इत्यादि लक्षणं भूरि काव्यस्याहुर्महर्षयः ।
स्वर्गभ्राजिष्णुभालत्वप्रभृतीव महीभुजः ॥ ११ ॥

महादेवः सत्रप्रमुखमखविद्यैकचतुरः
सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ ।
तृतीयस्तेनासौ सुकविजयदेवेन रचिते
चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः ॥ १२ ॥

इति श्रीपीयूषवर्षपण्डितजयदेवकृते चन्द्रालोकालङ्कारे
लक्षणविचारो नाम तृतीयो मयूखः ॥

— चतुर्थो मयूखः —

श्लेषो विघटमानार्थघटमानत्ववर्णनम् ।
स तु शाब्दः सजातीयैः शब्दैर्बन्धः सुखावहः ॥ १ ॥
उल्लसत्तनुतां नीतेऽनन्ते पुलककण्टकैः ।
भीतया मानवत्यैव श्रियाऽऽश्लिष्टं हरिं स्तुमः ॥ २ ॥
यस्मादन्तःस्थितः सर्वः स्पष्टमर्थोऽवभासते ।
सलिलस्येव सूक्तस्य स प्रसाद इति स्मृतः ॥ ३ ॥
समताऽल्पसमानत्वं वर्णाद्यैस्तुल्यताऽथ वा ।
श्यामला कोमला बाला रमणं शरणं गता ॥ ४ ॥
समाधिरर्थमहिमा लसद्धनरसात्मना ।
स्यादन्तर्विशता येन गात्रमङ्कुरितं सताम् ॥ ५ ॥
माधुर्यं पुनरुक्तस्य वैचित्र्यं चारुतावहम् ।
वयस्य पश्य पश्यास्याश्चञ्चलं लोचनाञ्चलम् ॥ ६ ॥
ओजः स्यात्प्रौढिरर्थस्य सङ्क्षेपो वाऽतिभूयसः ।
रिपुं हत्वा यशः कृत्वा त्वदसिः कोशमाविशत् ॥ ७ ॥
सौकुमार्यमपारुष्यं पर्यायपरिवर्तनाम् ।
स कथाशेषतां यातः समालिङ्ग्य मरुत्सखम् ॥ ८ ॥

उदारता तु वैदग्ध्यमग्राम्यत्वात्पृथङ् मता।
मानं मुञ्च प्रिये किञ्चिल्लोचनान्तमुदञ्चय ॥ ९ ॥
शृङ्गारे च प्रसादे च कान्त्यर्थव्यक्तिसङ्ग्रहः।
अमी दश गुणाः काव्ये पुंसि शौर्यादयो यथा ॥ १० ॥
तिलकाद्यमिव स्त्रीणां विदग्धहृदयङ्गमम्।
व्यतिरिक्तमलङ्कारं प्रकृतेर्भूषणं गिराम् ॥ ११ ॥
वैचित्र्यलक्षणं व्यासो निर्वाहः प्रौढिरौचिती।
शास्त्रान्तररहस्योक्तिः सङ्ग्रहो दिक् प्रदर्शिता ॥ १२ ॥
महादेवः सत्रप्रमुखमखविद्यैकचतुरः
सुमित्रातद्भक्तिप्रणिहितमतिर्यस्य पितरौ।
तुरीयस्तेनासौ सुकविजयदेवेन रचिते
चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः ॥ १३ ॥

इति श्रीपीयूषवर्षपण्डितजयदेवकृते चन्द्रालोकालङ्कारे
गुणनिरूपणाख्यः चतुर्थो मयूखः ॥

— पञ्चमो मयूखः —

शब्दार्थयोः प्रसिद्ध्या वा कवेः प्रौढिवशेन वा।
हारादिवदलङ्कारः सन्निवेशो मनोहरः ॥ १ ॥
स्वरव्यञ्जनसन्दोहव्यूहाऽमन्दोहदोहदा।
गौर्जगज्जाग्रदुत्सेका छेकानुप्रासभासुरा ॥ २ ॥
आवृत्तवर्णसम्पूर्णं वृत्त्यनुप्रासवद्वचः।
आमन्दानन्दसन्दोहस्वच्छन्दास्पन्दमन्दिरम् ॥ ३ ॥
लाटानुप्रासभूर्भिन्नाभिप्रायपुनरुक्तता।
यत्र स्यान्न पुनः शत्रोर्गर्जितं तज्जितं जितम् ॥ ४ ॥

श्लोकस्यार्धे तदर्धे वा वर्णावृत्तिर्यदि ध्रुवा।
तदा मता मतिमतां स्फुटानुप्रासता सताम्॥ ५॥
उपमेयोपमानादावर्थानुप्रास इष्यते।
चन्दनं खलु गोविन्दचरणद्वन्द्ववन्दनम्॥ ६॥
पुनरुक्तप्रतीकाशं पुनरुक्तार्थसन्निभम्।
अंशुकान्तं शशी कुर्वन्नम्बरान्तमुपैत्यसौ॥ ७॥
आवृत्तवर्णस्तबकं स्तवकन्दाङ्कुरं कवेः।
यमकं प्रथमा धुर्यमाधुर्यवचसो विदुः॥ ८॥
काव्यवित्प्रवरैश्चित्रं खड्गबन्धादि लक्ष्यते।
तेष्वाद्यमुच्यते श्लोकद्वयीसज्जनरञ्जिका॥ ९॥
कामिनीव भवत्खड्गलेखा चारुकरालिका।
काश्मीरसेकारक्ताङ्गी शत्रुकण्ठान्तिकाश्रिता॥ १०॥
उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।
हृदये खेलतोरुच्चैस्तन्वङ्गीस्तनयोरिव॥ ११॥
उपमानोपमेयत्वे यत्रैकस्यैव जागृतः।
इन्दुरिन्दुरिवेत्यादौ भवेदयमनन्वयः॥ १२॥
पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता।
धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि॥ १३॥
विख्यातस्योपमानस्य यत्र स्यादुपमेयता।
इन्दुर्मुखमिवेत्यादौ स्यात्प्रतीतोपमा तदा॥ १४॥
उपमाने च लीलादिपदाढ्ये ललितोपमा।
त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः॥ १५॥
अनेकार्थस्य युग्मस्य सादृश्ये स्तबकोपमा।
श्रितोऽस्मि चरणौ विष्णोर्भृङ्गस्तामरसं यथा॥ १६॥

स्यात्सम्पूर्णोपमा यत्र द्वयोरपि विधेयता ।
पद्मानीव विनिद्राणि नेत्राण्यासन्नहर्मुखे ॥ १७ ॥
यत्रोपमानचित्रेण सर्वथाप्युपरज्यते ।
उपमेयमयी भित्तिस्तत्र रूपकमिष्यते ॥ १८ ॥
समानधर्मयुक्साध्यारोपात्सोपाधिरूपकम् ।
उत्सिक्तक्षितिभृल्लक्षपक्षच्छेदपुरन्दरः ॥ १९ ॥
पृथक्कथितसादृश्यं दृश्यसादृश्यरूपकम् ।
उल्लसत्पञ्चशाखस्ते भ्राजते भुजभूरुहः ॥ २० ॥
स्यादङ्गयष्टिरित्येवंविधमाभासरूपकम् ।
अङ्गयष्टिधनुर्वल्लीत्यादि रूपितरूपकम् ॥ २१ ॥
परिणामोऽनयोर्यस्मिन्नभेदः पर्यवस्यति ।
कान्तेन पृष्टा रहसि मौनमेवोत्तरं ददौ ॥ २२ ॥
बहुभिर्बहुधोल्लेखादेकस्योल्लेखता मता ।
स्त्रीभिः कामः प्रियैश्चन्द्रः कालः शत्रुभिरैक्षि सः ॥ २३ ॥
अतथ्यमारोपयितुं तथ्याऽपास्तिरपह्नुतिः ।
नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम् ॥ २४ ॥
पर्यस्तापह्नुतिर्यत्र धर्ममात्रं निषिध्यते ।
नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखम् ॥ २५ ॥
भ्रान्तापह्नुतिरन्यस्य शङ्कया तथ्यनिर्णये ।
तापं तनोति सोत्कम्पं ज्वरः किं न सखि स्मरः ॥ २६ ॥
छेकापह्नुतिरन्यस्य शङ्कया तथ्यनिह्नवे ।
प्रजल्पन्मत्पदे लग्नः कान्तः किं नहि नूपुरः ॥ २७ ॥
कैतवं व्यज्यमानत्वे व्याजाद्यैर्निह्नुतेः पदैः ।
निर्यान्ति स्मरनाराचाः कान्तादृक्पातकैतवात् ॥ २८ ॥

उत्प्रेक्षोन्नीयते यत्र हेत्वादिर्निह्नुतिं विना।
त्वन्मुखश्रीकृते नूनं पद्मैर्वैरायते शशी॥ २९॥
इवादिकपदाभावे गूढोत्प्रेक्षा प्रचक्षते।
यत्कीर्तिर्विभ्रमश्रान्ता विवेश स्वर्गनिम्नगाम्॥ ३०॥
स्यात्स्मृतिभ्रान्तिसन्देहैस्तदेवाऽलङ्कृतित्रयम्।
पङ्कजं पश्यतः कान्तामुखं मे गाहते मनः॥ ३१॥
अयं प्रमत्तमधुपस्त्वन्मुखं वेद पङ्कजम्।
पङ्कजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः॥ ३२॥
मीलितं बहुसादृश्याद् भेदवच्चेन्न लक्ष्यते।
रसो नालक्षि लाक्षायाश्चरणे सहजारुणे॥ ३३॥
सामान्यं यदि सादृश्याद् भेद एव न लक्ष्यते।
पद्माकरप्रविष्टानां मुखं नालक्षि सुभ्रुवाम्॥ ३४॥
हेतोः कुतोऽपि वैशिष्ट्यात् स्फूर्तिरुन्मीलितं मतम्।
लक्षितान्युदिते चन्द्रे पद्मानि च मुखानि च॥ ३५॥
अनुमानं च कार्यादेः कारणाद्यवधारणम्।
अस्ति किञ्चिद् यदनया मां विलोक्य स्मितं मनाक्॥ ३६॥
अर्थापत्तिः स्वयं सिध्येत्पदार्थान्तरवर्णनम्।
स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहाम्॥ ३७॥
स्यात्काव्यलिङ्गं वागर्थो यत्र हेतुसमर्थकः।
जितोऽसि मन्द कन्दर्प मच्चित्तेऽस्ति त्रिलोचनः॥ ३८॥
अलङ्कारः परिकरः साभिप्राये विशेषणे।
सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः॥ ३९॥
साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः।
चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः॥ ४०॥

अक्रमातिशयोक्तिश्चेद्युगपत्कार्यकारणे ।
आलिङ्गन्ति समं देव ज्यां शराश्च पराश्च ते ॥ ४१ ॥
अत्यन्तातिशयोक्तिस्तु पौर्वापर्यव्यतिक्रमे ।
अग्रे मानो गतः पश्चादनुनीता प्रियेण सा ॥ ४२ ॥
चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे ।
यामीति प्रियपृष्टाया वलयोऽभवदूर्मिका ॥ ४३ ॥
सम्बन्धातिशयोक्तिः सा तदभावेऽपि तद्वचः ।
पश्य सौधाग्रसंसिक्तं विभाति विधुमण्डलम् ॥ ४४ ॥
भेदकातिशयोक्तिश्चेदेकस्यैवान्यतोच्यते ।
अहो अन्यैव लावण्यलीला बालाकुचस्थले ॥ ४५ ॥
रूपकातिशयोक्तिश्चेद्रूप्यं रूपकमध्यगम् ।
पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः ॥ ४६ ॥
प्रौढोक्तिस्तदशक्तस्य तच्छक्तत्वाऽवकल्पनम् ।
कलिन्दजातीररुहाः श्यामलाः सरलद्रुमाः ॥ ४७ ॥
सम्भावनं यदीत्थं स्यादित्यूहोऽन्यप्रसिद्धये ।
सिक्तं स्फटिककुम्भान्तःस्थितिश्वेतीकृतैर्जलैः ॥ ४८ ॥
मौक्तिकं चेल्लतां सूते तत्पुष्पैस्ते समं यशः ।
वाञ्छितार्थाधिकप्राप्तिर्यद्यन्येन प्रहर्षणम् ॥ ४९ ॥
दीपमुद्द्योतयेद्यावत् तावदभ्युदितो रविः ।
इष्यमाणविरुद्धार्थसम्प्राप्तिस्तु विषादनम् ॥ ५० ॥
दीपमुद्द्योतयेद्यावत् तावन्निर्वाण एव सः ।
क्रियादिभिरनेकस्य तुल्यता तुल्ययोगिता ॥ ५१ ॥
सङ्कुचन्ति सरोजानि स्वैरिणीवदनानि च ।
प्राचीनाचलचूडाग्रचुम्बिबिम्बे सुधाकरे ॥ ५२ ॥

प्रस्तुताप्रस्तुतानां च तुल्यत्वे दीपकं मतम्।
मेधा बुधः सुधामिन्दुर्बिभर्ति वसुधां भवान्॥ ५३॥
आवृत्ते दीपकपदे भवेदावृत्तिदीपकम्।
दीप्त्याग्निर्भाति भातीन्दुः कान्त्या भाति रविस्त्विषा॥ ५४॥
वाक्ययोरर्थसामान्ये प्रतिवस्तूपमा मता।
तापेन भ्राजते सूरः शूरश्चापेन राजते॥ ५५॥
चेद् बिम्बप्रतिबिम्बत्वे दृष्टान्तस्तदलङ्कृतिः।
स्यान्मल्लप्रतिमल्लत्वे सङ्ग्रामोद्दामहुङ्कृतिः॥ ५६॥
दृष्टाऽन्तश्चेद्भवन्मूर्तिस्तन्मृष्टा दैवदुर्लिपिः।
जाता चेत्प्राक् प्रभा भानोस्तर्हि याता विभावरी॥ ५७॥
वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना।
यद्दातुः सौम्यता सेयं सुधांशोरकलङ्कता॥ ५८॥
व्यतिरेको विशेषश्चेदुपमानोपमेययोः।
शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः॥ ५९॥
सहोक्तिः सहभावश्चेद्भासते जनरञ्जनः।
दिगन्तमगमद्यस्य कीर्तिः प्रत्यर्थिभिः सह॥ ६०॥
विनोक्तिश्चेद्विना किञ्चित्प्रस्तुतं हीनमुच्यते।
विद्या हृद्यापि साऽवद्या विना विनयसम्पदा॥ ६१॥
समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्।
अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः॥ ६२॥
खण्डश्लेषः पदानां चेदेकैकं पृथगर्थता।
उच्छलद्भूरिकीलालः शुशुभे वाहिनीपतिः॥ ६३॥
भङ्गश्लेषः पदस्तोमस्यैव चेत्पृथगर्थता।
अजरामरता कस्य नायोध्येव पुरी प्रिया॥ ६४॥

अर्थश्लेषोऽर्थमात्रस्य यद्यनेकार्थ आश्रयः ।
कुटिलाः श्यामला दीर्घाः कटाक्षाः कुन्तलाश्च ते ॥ ६५ ॥
अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुतानुगा ।
कार्यकारणसामान्यविशेषादेरसौ मता ॥ ६६ ॥
कमलैः कमलावासैः किं किं नासादि सुन्दरम् ।
अप्यम्बुधेः परं पारं प्रयान्ति व्यवसायिनः ॥ ६७ ॥
भवेदर्थान्तरन्यासोऽनुषक्तार्थान्तराभिधा ।
हनुमानब्धिमतरद् दुष्करं किं महात्मनाम् ॥ ६८ ॥
यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः ।
स न जिग्ये महान्तो हि दुर्धर्षाः क्ष्माधरा इव ॥ ६९ ॥
कार्याद्यैः प्रस्तुतैरुक्ते पर्यायोक्तिं प्रचक्षते ।
तृणान्यङ्कुरयामास विपक्षनृपसद्मसु ॥ ७० ॥
उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः ।
कस्ते विवेको नयसि स्वर्गं पातकिनोऽपि यत् ॥ ७१ ॥
आक्षेपस्तु प्रयुक्तस्य प्रतिषेधो विचारणात् ।
चन्द्र सन्दर्शयात्मानमथवाऽस्ति प्रियामुखम् ॥ ७२ ॥
गूढाक्षेपो विधौ व्यक्ते निषेधे चाऽस्फुटे सति ।
हर सीतां सुखं किन्तु चिन्तयाऽन्तकढौकनम् ॥ ७३ ॥
विरोधोऽनुपपत्तिश्चेद् गुणद्रव्यक्रियादिषु ।
अमन्दचन्दनस्यन्दः स्वच्छन्दं दन्दहीति माम् ॥ ७४ ॥
श्लेषादिभूर्विरोधश्चेद्विरोधाभासता मता ।
अप्यन्धकारिणा तेन जगदेतत्प्रकाशते ॥ ७५ ॥
असम्भवोऽर्थनिष्पत्तावसम्भाव्यत्ववर्णनम् ।
को वेद गोपशिशुकः शैलमुत्पाटयिष्यति ॥ ७६ ॥

विभावना विनापि स्यात्कारणं कार्यजन्म चेत् ।
पश्य लाक्षारसाऽसिक्तं रक्तं त्वच्चरणद्वयम् ॥ ७७ ॥
विशेषोक्तिरनुत्पत्तिः कार्यस्य सति कारणे ।
नमन्तमपि धीमन्तं न लङ्घयति कश्चन ॥ ७८ ॥
आख्याते भिन्नदेशत्वे कार्यहेत्वोरसङ्गतिः ।
त्वद्भक्तानां नमत्यङ्गं भङ्गमेति भवक्लमः ॥ ७९ ॥
विषमं यद्यनौचित्यादनेकान्वयकल्पनम् ।
क्वाऽतितीव्रविषाः सर्पाः क्वासौ चन्दनभूरुहः ॥ ८० ॥
सममौचित्यतोऽनेकवस्तुसम्बन्धवर्णनम् ।
अनुरूपं कृतं सद्म हारेण कुचमण्डलम् ॥ ८१ ॥
विचित्रं चेत्प्रयत्नः स्याद्विपरीतफलप्रदः ।
नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिम् ॥ ८२ ॥
अधिकं बोध्यमाधारादाधेयाधिक्यवर्णनम् ।
यया व्याप्तं जगत्तस्यां वाचि मान्ति न ते गुणाः ॥ ८३ ॥
अन्योन्यं नाम यत्र स्यादुपकारः परस्परम् ।
त्रियामा शशिना भाति शशी भाति त्रियामया ॥ ८४ ॥
विशेषः ख्यातमाधारं विनाप्याधेयवर्णनम् ।
गतेऽपि सूर्ये दीपस्थास्तमश्छिन्दन्ति तत्कराः ॥ ८५ ॥
स्याद् व्याघातोऽयथाकारि वस्त्वन्यक्रियमुच्यते ।
यैर्जगत्प्रीयते हन्ति तैरेव कुसुमायुधः ॥ ८६ ॥
गुम्फः कारणमाला स्याद् यथाप्राक्प्रान्तकारणैः ।
नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः ॥ ८७ ॥
गृहीतमुक्तरीत्यर्थश्रेणिरेकावली मता ।
नेत्रे कर्णान्तविश्रान्ते कर्णौ दोर्मूलदोलिनौ ॥ ८८ ॥

दीपकैकावलीयोगान्मालादीपकमिष्यते ।
स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थितिः ॥ ८९ ॥
सारो नाम पदोत्कर्षः सारताया यथोत्तरम् ।
सारं सारस्वतं तत्र काव्यं तत्र शिवस्तवः ॥ ९० ॥
उदारसारश्चेद्भाति भिन्नोऽभिन्नतया गुणः ।
मधुरं मधु पीयूषं तस्मात् तस्मात्कवेर्वचः ॥ ९१ ॥
यथासङ्ख्यं द्विधार्थाश्चेत् क्रमादेकैकमन्विताः ।
शत्रुं मित्रं द्विषत्पक्षं जय रञ्जय तर्जय ॥ ९२ ॥
पर्यायश्चेदनेकत्र स्यादेकस्य समन्वयः ।
पद्मं मुक्त्वा गता चन्द्रं कामिनीवदनोपमा ॥ ९३ ॥
परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः ।
जग्राहैकं शरं मुक्त्वा कटाक्षान् शत्रुयोषितः ॥ ९४ ॥
परिसङ्ख्या निषिध्यैकमन्यस्मिन् वस्तुयन्त्रणम् ।
स्नेहस्त्वयं प्रदीपेषु न, स्वान्तेषु नतभ्रुवाम् ॥ ९५ ॥
विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयुतः ।
कान्त चित्तेऽधरे वापि कुरु त्वं वीतरागताम् ॥ ९६ ॥
भूयसामेकसम्बन्धभाजां गुम्फः समुच्चयः ।
नश्यन्ति पश्चात्पश्यन्ति भ्रश्यन्ति च तव द्विषः ॥ ९७ ॥
समाधिः कार्यसौकर्यं कारणान्तरसन्निधेः ।
उत्कण्ठतां च कलयन् जगामाऽस्तं च भानुमान् ॥ ९८ ॥
प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः ।
जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधः कृतौ ॥ ९९ ॥
प्रतीपमुपमानस्य हीनत्वमुपमेयतः ।
दृष्टं चेद् वदनं तस्याः किं पद्मेन किमिन्दुना ॥ १०० ॥

उल्लासोऽन्यमहिम्ना चेद्दोषो ह्यन्यत्र वर्ण्यते।
तदभाग्यं धनस्यैव यन्नाश्रयति सज्जनम्॥ १०१ ॥
तद्गुणः स्वगुणत्यागे स्वस्मिन्परगुणोदये।
पद्मरागारुणं नासामौक्तिकं तेऽधराश्रितम्॥ १०२ ॥
पुनः स्वगुणसम्प्राप्तिर्विज्ञेया पूर्वरूपता।
हरकण्ठांशुलिप्तोऽपि शेषस्त्वद्यशसा सितः॥ १०३ ॥
यद्वस्तुनोऽन्यथारूपं तथा स्यात्पूर्वरूपता।
दीपे निर्वापिते ह्यासीत् काञ्चीरत्नैरहर्महः॥ १०४ ॥
सङ्गताऽन्यगुणानङ्गीकारमाहुरतद्गुणम्।
विशन्नपि रवेर्मध्यं शीत एव सदा शशी॥ १०५ ॥
प्राक्सिद्धिः स्वगुणोत्कर्षोऽनुगुणः परसन्निधेः।
कर्णोत्पलानि दधते कटाक्षैरपि नीलताम्॥ १०६ ॥
अवज्ञा वर्ण्यते वस्तु गुणदोषाऽक्षमं यदि।
म्लायन्ति यदि पद्मानि का हानिरमृतद्युतेः॥ १०७ ॥
प्रश्नोत्तरं क्रमेणोक्तौ स्यूतमुत्तरमुत्तरम्।
यत्रासौ वेतसी पान्थ तत्रेयं सुतरा सरित्॥ १०८ ॥
पिहितं परवृत्तान्तज्ञातुरन्यत्र चेष्टितम्।
प्रिये गृहागते प्रातः कान्ता तल्पमकल्पयत्॥ १०९ ॥
व्याजोक्तिः शङ्कमानस्य छद्मना वस्तुगोपनम्।
सखि पश्य गृहारामकेसरैरस्मि धूसरा॥ ११० ॥
वक्रोक्तिः श्लेषकाकुभ्यां वाच्यार्थान्तरकल्पनम्।
मुञ्च मानं दिनं प्राप्तं, मन्द नन्दी हरान्तिके॥ १११ ॥
स्वभावोक्तिः स्वभावस्य स्वजात्यादिषु वर्णनम्।
कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते॥ ११२ ॥

भाविकं भूतभाव्यर्थसाक्षाद्दर्शनवर्णनम् ।
अलं विलोकयाद्यापि युध्यन्तेऽत्र सुरासुराः ॥ ११३ ॥
देशात्मविप्रकृष्टस्य दर्शनं भाविकच्छविः ।
त्वं वसन् हृदये तस्याः साक्षात्पञ्चेषुरीक्ष्यसे ॥ ११४ ॥
उदात्तमृद्धिश्चरितं श्लाघ्यं चाऽन्योपलक्षणम् ।
सानौ यस्याभवद्युद्धं तद्धूर्जटिकिरीटिनोः ॥ ११५ ॥
अत्युक्तिरद्भुताऽतथ्यशौर्यौदार्यादिवर्णनम् ।
त्वयि दातरि राजेन्द्र याचकाः कल्पशाखिनः ॥ ११६ ॥
रसभावतदाभासभावशान्तिनिबन्धना ।
रसवत्प्रेयऊर्जस्विसमाहितमयी भिदा ॥ ११७ ॥
भावानामुदयः सन्धिः शबलत्वमिति त्रयः ।
अलङ्कारानिमान् सप्त केचिदाहुर्मनीषिणः ॥ ११८ ॥
शुद्धिरेकप्रधानत्वं तथा संसृष्टिसङ्करौ ।
एतेषामेव विन्यासान्नालङ्कारान्तराण्यमी ॥ ११९ ॥
सर्वेषां च प्रतिद्वन्द्वप्रतिच्छन्दभिदाभृताम् ।
उपाधिः क्वचिदुद्भिन्नः स्यादन्यत्रापि सम्भवात् ॥ १२० ॥
माला परम्परा चैषां भूयसामनुकूलके ।
मनुष्ये भवतः क्वापि ह्यलङ्काराङ्गतां गते ॥ १२१ ॥
शब्दे परार्थे वाक्यार्थे वाक्यार्थस्तबके तथा ।
एते भवन्ति विन्यासाः स्वभावातिशयात्मकाः ॥ १२२ ॥
कस्याप्यतिशयस्योक्तिरित्यन्वर्थविचारणात् ।
प्रायेणामी अलङ्कारा भिन्ना नातिशयोक्तितः ॥ १२३ ॥
अलङ्कारप्रकारेषु दधानेष्वपि साम्यताम् ।
वैलक्षण्यं प्रतिव्यक्ति प्रतिभाति मुखेष्विव ॥ १२४ ॥

अलङ्कारेषु तथ्येषु यद्यनास्था मनीषिणाम् ।
तदर्वाचीनभेदेषु नाम्नां नाऽऽम्नाय इष्यताम् ॥ १२५ ॥

महादेवः सत्रप्रमुखमखविद्यैकचतुरः
सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ ।
चतुर्थः सैकोऽयं सुकविजयदेवेन रचिते
चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः ॥ १२६ ॥

इति श्रीपीयूषवर्षपण्डितजयदेवकृते चन्द्रालोकालङ्कारे
अलङ्कारनिरूपणाख्यः पञ्चमो मयूखः ॥

— षष्ठो मयूखः —

आलम्बनोद्दीपनात्मा विभावः करणं द्विधा ।
कार्योऽनुभावो भावस्तु सहायो व्यभिचार्यपि ॥ १ ॥

गलद्वेद्यान्तरोद्भेदं हृदयेऽप्यजहात्मनाम् ।
मिलन्मलयजालेप इवाह्लादं विकासयन् ॥ २ ॥

काव्ये नाट्ये च कार्ये च विभावाद्यैर्विभावितः ।
आस्वाद्यमानैकतनुः स्थायी भावो रसः स्मृतः ॥ ३ ॥

रत्याख्यस्थायिभावात्मा वल्लभादिविभावितः ।
आलस्येर्ष्याजुगुप्साभ्यो विना सञ्चारिभिर्युतः ॥ ४ ॥

अनुभावैः कटाक्षाद्यैरुन्मादाद्यैर्यथाक्रमम् ।
संयोगो विप्रलम्भश्च शृङ्गारो द्विविधो रसः ॥ ५ ॥

हासस्थायी रसो हास्यो विभावाद्यैर्यथाक्रमम् ।
वैरूप्यफुल्लगण्डत्वावहित्थाद्यैः समन्वितः ॥ ६ ॥

अभीष्टविप्रयोगाऽश्रुपातग्लान्यादिभिः क्रमात् ।
विभावाद्यैर्युतः शोकस्थायी स्यात् करुणो रसः ॥ ७ ॥

क्रोधस्थायी रसो रौद्रो विभावाद्यैः समन्वितः ।
मात्सर्यहस्तनिष्पेषसम्मोहाद्यैर्यथाक्रमम् ॥ ८ ॥
उत्साहाख्यस्थायिभावः प्रभावादिविभावभूः ।
वीरोऽनुभावैः स्थैर्याद्यैर्भावैर्गर्वादिभिर्युतः ॥ ९ ॥
व्याघ्रादिभिर्विभावैस्तु वेपिताद्यनुभावभृत् ।
भावैर्मोहादिभिर्युक्तो भयस्थायी भयानकः ॥ १० ॥
स्थायी जुगुप्सा वीभत्सो विभावाद्यैर्यथाक्रमम् ।
अनिष्टेक्षणनिष्ठ्यूतिमोहाद्याः सम्मताः क्रमात् ॥ ११ ॥
अद्भुतो विस्मयस्थायी मायादिकविभावभूः ।
रोमाञ्चाद्यनुभावोऽयं स्तम्भादिव्यभिचारकः ॥ १२ ॥
निर्वेदस्थायिकः शान्तः सत्सङ्गादिविभावभूः ।
क्षमादिकाऽनुभावोऽयं स्तम्भादिव्यभिचारकः ॥ १३ ॥
रतिर्देवादिविषया सन्ति च व्यभिचारिणः ।
वेद्यमाना निगद्यन्ते भावाः साहित्यवेदिभिः ॥ १४ ॥
निर्वेदग्लानिशङ्काख्यास्तथाऽसूयामदक्लमाः ।
आलस्यं चैव दैन्यं च चिन्ता मोहो धृतिः स्मृतिः ॥ १५ ॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च ॥ १६ ॥
सुप्तं विबोधाऽमर्षश्चाप्यवहित्था तथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ १७ ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ॥ १८ ॥
सर्वसाधारणप्रेमप्रश्रयादिस्वरूपया ।
अनौचित्या रसाभासा भावाभासाश्च कीर्तिताः ॥ १९ ॥

भावस्य शान्तिरुदयः सन्धिः शबलता तथा ।
काव्यस्य काञ्चनस्येव कुङ्कुमं कान्तिसम्पदे ॥ २० ॥
आचतुष्टयमासप्त यथेष्टैरष्टमादिभिः ।
समासः स्यात् पदैर्न स्यात् समासः सर्वथाऽपि च ॥ २१ ॥
पाञ्चालिकी च लाटीया गौडीया च यथारसम् ।
वैदर्भी च यथासङ्ख्यं चतस्रो रीतयः स्मृताः ॥ २२ ॥
मधुरायां समाक्रान्ता वर्गस्थाः पञ्चमैर्निजैः ।
लकारश्च लसंयुक्तो ह्रस्वव्यवहितौ रणौ ॥ २३ ॥
रेफाक्रान्ता वर्ग्ययणाष्टवर्गात्पञ्चमाद् ऋते ।
कपाक्रान्तस्तवर्गः स्यात् प्रौढायां च कमूर्धता ॥ २४ ॥
सर्वैरूर्ध्वैः सकारस्य सर्वै रेफस्य सर्वथा ।
रहौ द्वेधा तु संयोगः परुषायां शषौ स्वतः ॥ २५ ॥
लकारोऽन्यैरसंयुक्तो लघवो घभघा रसाः ।
ललितायां तथा शेषा भद्रायामिति वृत्तयः ॥ २६ ॥
अङ्गभङ्गोल्लसल्लीला तरुणी स्मरतोरणम् ।
तर्ककर्कशपूर्णोक्तिप्राप्तोत्कटधियां वृथा ॥ २७ ॥
वीप्सोत्सर्पन्मुखाग्रार्द्रं बर्ही जह्रे कृशस्तृषम् ।
ललना रभसं धत्ते घनाटोपे महीयसि ॥ २८ ॥
महादेवः सत्रप्रमुखमखविद्यैकचतुरः
        सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ ।
मयूखस्तेनासौ सुकविजयदेवेन रचिते
        चिरं चन्द्रालोके महति ऋतुसङ्ख्यः सुखयतु ॥ २९ ॥

इति श्रीपीयूषवर्षपण्डितजयदेवकृते चन्द्रालोकालङ्कारे
रसरीतिवृत्तिविचारो नाम षष्ठो मयूखः ॥

— सप्तमो मयूखः —

वृत्तिभेदैस्त्रिभिर्युक्ता स्रोतोभिरिव जाह्नवी ।
भारती भाति गम्भीरा कुटिला सरला क्वचित् ॥ १ ॥
साम्मुख्यं विदधानायाः स्फुटमर्थान्तरे गिरः ।
कटाक्ष इव लोलाक्ष्या व्यापारो व्यञ्जनात्मकः ॥ २ ॥
अविवक्षितवाच्यस्य द्वौ भेदौ वाच्यमेव चेत् ।
अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम् ॥ ३ ॥
द्वौ विवक्षितवाच्यस्य लक्ष्यालक्ष्यक्रमात्मकौ ।
चत्वारिंशद् युतैकेन भेदाः षट् चानयोः क्रमात् ॥ ४ ॥
त्रिधा शब्दार्थतद्युग्मशक्तिजन्मा स्फुटक्रमः ।
रसभावतदाभासप्रमुखस्त्वस्फुटक्रमः ॥ ५ ॥
वस्त्वलङ्कारयोर्व्यक्तिः शब्दाद् द्वौ शब्दशक्तिजौ ।
अर्थशक्तिसमुत्थस्य भेदा द्वादश तद्यथा ॥ ६ ॥
चत्वारो वस्त्वलङ्कारमलङ्कारस्तु वस्तु यत् ।
अलङ्कारमलङ्कारो वस्तु वस्तु व्यनक्ति तत् ॥ ७ ॥
वक्तुः कविनिबद्धस्य कवेर्वा प्रौढिनिर्मितः ।
स्वसिद्धो वा व्यञ्जकोऽर्थश्चत्वारस्त्रिगुणास्ततः ॥ ८ ॥
शब्दार्थोभयभूरेकः स च वाक्यैकसंश्रयः ।
पदैकदेशरचनावर्णवाक्यपदेष्वपि ॥ ९ ॥
प्रबन्धे चेति षोढाऽसौ रसाद्याख्योऽस्फुटक्रमः ।
एषु सप्तदशस्वेकं परित्यज्याऽस्फुटक्रमम् ॥ १० ॥
ये षोडशाद्या द्विगुणास्ते स्युर्वाक्यपदाश्रयात् ।
प्रबन्धेऽपि द्वादश स्युरर्थशक्तिभुवो भिदः ॥ ११ ॥

द्वात्रिंशद् द्वादशैकः षट् सर्वे सङ्कलिता ध्वनेः ।
भेदाः स्युरेकपञ्चाशत् सम्भिन्नास्तु सहस्रशः ॥ १२ ॥
वक्तृस्यूतं बोधयितुं व्यङ्ग्यं वक्तुरभीप्सितम् ।
स्वाङ्कुरितमतद्रूपं स्वयमुच्छ्वसितं गिरा ॥ १३ ॥
कश्चित्साधारणः कश्चिदामन्त्र्य प्रतिबोधितः ।
कश्चित्तटस्थः कश्चिच्च बोधितप्रतिबोधितः ॥ १४ ॥
इत्येवं बोद्धृवैचित्र्याद् वक्तृस्यूतं चतुर्विधम् ।
उपेक्षानिह्नवाभ्यां च द्विधा स्वाङ्कुरितं मतम् ॥ १५ ॥
भूतादिकालभेदेन निह्नवः स्यादनेकधा ।
अनेनापि प्रभेदेन व्यक्तिवल्ली विजृम्भते ॥ १६ ॥
नानाप्रभेदा नियताः क्वचित्प्रकरणादिना ।
अर्थेऽर्थमन्यं यद्वक्ति तद्वाच्यव्यङ्ग्यमिष्यते ॥ १७ ॥
महादेवः सत्रप्रमुखमखविद्यैकचतुरः
सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ ।
मयूखस्तेनासौ सुकविजयदेवेन रचिते
चिरं चन्द्रालोके महति मुनिसङ्ख्यः सुखयतु ॥ १८ ॥

इति श्रीपीयूषवर्षपण्डितजयदेवकृते चन्द्रालोकालङ्कारे
ध्वनिनिरूपणाख्यः सप्तमो मयूखः ॥

— अष्टमो मयूखः —

यद्व्यज्यमानं मनसः स्तैमित्याय स नो ध्वनिः ।
अन्यथा तु गुणीभूतव्यङ्ग्यमापतति त्रिधा ॥ १ ॥
व्यक्त एव क्वचिद् व्यङ्ग्यः क्वचिदर्थस्वभावतः ।
क्वचिच्चारुतरस्याग्रे स विमुञ्चति चारुताम् ॥ २ ॥

अगूढं कलयेदर्थान्तरसङ्क्रमितादिकम् ।
विस्मृतः किमपांनाथ स त्वया कुम्भसम्भवः ॥ ३ ॥
अपरस्य रसादेश्चेदङ्गमन्यद् रसादिकम् ।
हा हा मत्कुचकाश्मीरलिप्तं भिन्नमुरः शरैः ॥ ४ ॥
तथा वाच्यस्य सिद्ध्यङ्गं नौरर्थो वारिधेर्यथा ।
संश्रित्य तरणिं धीरास्तरन्ति व्याधिवारिधीन् ॥ ५ ॥
अस्फुटं स्तनयोरत्र कोकसादृश्यवन्मतम् ।
कुङ्कुमाक्तं स्तनद्वन्द्वं मानसं मम गाहते ॥ ६ ॥
सन्दिग्धं यदि सन्देहो दैर्घ्याद्युत्पलयोरिव ।
सम्प्राप्ते नयने तस्याः श्रवणोत्तंसभूमिकाम् ॥ ७ ॥
तुल्यप्राधान्यमिन्दुत्वमिव वाच्येन साम्यभृत् ।
कान्ते त्वदाननरुचा म्लानिमेति सरोरुहम् ॥ ८ ॥
असुन्दरं यदि व्यङ्ग्यं स्याद्वाच्यादमनोहरम् ।
सरस्यामीलदम्भोजे चक्रः कान्तां विलोकते ॥ ९ ॥
काकुत्स्थं प्रणतोऽम्भोधिरद्य माद्यतु रावणः ।
इत्यष्टधा गुणीभूतव्यङ्ग्यमङ्गीकृतं बुधैः ॥ १० ॥

महादेवः सत्रप्रमुखमखविद्यैकचतुरः
सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ ।
मयूखस्तेनासौ सुकविजयदेवेन रचिते
चिरं चन्द्रालोके महति वसुसङ्ख्यः सुखयतु ॥ ११ ॥

इति श्रीपीयूषवर्षपण्डितजयदेवकृते चन्द्रालोकालङ्कारे
गुणीभूतव्यङ्ग्यनिरूपणनाम अष्टमो मयूखः ॥

— नवमो मयूखः —

मुख्यार्थस्याविवक्षायां पूर्वाऽर्वाची च रूढितः ।
प्रयोजनाच्च सम्बन्धं वदन्ती लक्षणा मता ॥ १ ॥
लक्षणीयस्य शब्दस्य मीलनाऽमीलनाद् द्विधा ।
लक्षणा सा त्रिधा सिद्धसाध्यसाध्याङ्गभेदतः ॥ २ ॥
स्फुटाऽस्फुटप्रभेदेन प्रयोजनमपि द्विधा ।
विदुः स्फुटं तटस्थत्वादर्थगत्वाद् द्विधा बुधाः ॥ ३ ॥
अस्फुटं चार्थनिष्ठत्वात्तटस्थत्वादपि द्विधा ।
लक्ष्यलक्षकनिष्ठत्वादर्थसंस्थमपि द्विधा ॥ ४ ॥
लक्षकस्थं स्फुटं यत्र सा विचक्षणलक्षणा ।
अर्थगत्वतटस्थत्वभेदाभ्यामस्फुटस्य च ॥ ५ ॥
अन्त्या द्विधेति विज्ञेया व्यक्तितः सा चतुर्विधा ।
इन्दुरेवैष तद्वक्त्रमुत्कर्षो लक्ष्यते मुखे ॥ ६ ॥
प्रदीपं वर्धयेत्यत्र तटस्थं मङ्गलोदयः ।
पटोऽयं दग्ध इत्यादौ स्फुटं नास्ति प्रयोजनम् ॥ ७ ॥
अमृतं सूक्तमित्यादौ लक्ष्यस्थमतिहृद्यता ।
आभिमुख्यात् सन्निधानात्तथाऽऽकारप्रतीतितः ॥ ८ ॥
कार्यकारणभावाच्च वाच्यवाचकभावतः ।
इत्येवमादिसम्बन्धात् किञ्चान्यस्माच्चतुष्टयात् ॥ ९ ॥
सादृश्यात् समवायात् सा वैपरीत्यात् क्रियान्वयात् ।
सारोपाध्यवसानाख्ये गौणशुद्धे पृथक् पृथक् ॥ १० ॥
गौणं सारोपमुद्दिष्टमिन्दुर्मुखमितीदृशम् ।
गौणं साध्यवसानं स्यादिन्दुरेवेदमीदृशम् ॥ ११ ॥
शुद्धं सारोपमुद्दिष्टमायुर्घृतमितीदृशम् ।

शुद्धं साध्यवसानं स्यादायुरेवेदमीदृशम् ॥ १२ ॥
उपादानार्पणद्वारे द्वे चान्ये इति षड्विधा ।
कुन्ता विशन्ति गङ्गायां घोषो निवसतीति च ॥ १३ ॥
लक्ष्यलक्षकवैशिष्ट्यवैशिष्ट्याद् द्विविधा पुनः ।
सरसं काव्यममृतं विद्या स्थिरतरं धनम् ॥ १४ ॥
तथा सहेतुरतयाभेदभिन्ना च कुत्रचित् ।
सौन्दर्येणैव कन्दर्पः सा च मूर्तिमती रतिः ॥ १५ ॥
शब्दे पदार्थे वाक्यार्थे सङ्ख्यायां कारके तथा ।
लिङ्गे चेयमलङ्काराङ्कुरबीजतया स्थिता ॥ १६ ॥
महादेवः सत्रप्रमुखमखविद्यैकचतुरः
सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ ।
मयूखस्तेनासौ सुकविजयदेवेन रचिते
चिरं चन्द्रालोके महति नवसङ्ख्यः सुखयतु ॥ १७ ॥

इति श्रीपीयूषवर्षपण्डितजयदेवकृते चन्द्रालोकालङ्कारे
लक्षणानिरूपणाख्यो नवमो मयूखः ॥

— दशमो मयूखः —

धर्मं कञ्चित् पुरस्कृत्य प्रायः शब्दः प्रवर्तते।
यथार्थं स्पष्टमाचष्टे शब्दस्तामभिधां विदुः॥ १॥
जात्या गुणेन क्रियया वस्तुयोगेन संज्ञया।
निर्देशेन च मन्यन्ते षड्विधामभिधां बुधाः॥ २॥
गौः शुक्लः पाचको दण्डी डित्थः कंस इति क्रमात्।
कं संहिनस्ति कंसारिर्नरं कं च समाश्रितम्॥ ३॥
न योगादेरायतनं न सङ्केतनिकेतनम्।
वृत्या निर्देशशब्दोऽयं मुख्यया स्वाभिधेयया॥ ४॥
पीयूषवर्षप्रभवं चन्द्रालोकं मनोहरम्।
सुधानिधानमासाद्य श्रयध्वं विबुधा मुदम्॥ ५॥
जयन्ति याज्ञिकश्रीमन्महादेवाङ्गजन्मनः।
सूक्तपीयूषवर्षस्य जयदेवकवेर्गिरः॥ ६॥
महादेवः सत्रप्रमुखमखविद्यैकचतुरः
सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ।
मयूखस्तेनासौ सुकविजयदेवेन रचिते
चिरं चन्द्रालोके महदि दशसङ्ख्यः सुखयतु॥ ७॥

इति श्रीपीयूषवर्षपण्डितजयदेवकृते चन्द्रालोकालङ्कारे
अभिधानिरूपणाख्यो दशमो मयूखः॥

॥ समाप्तश्चायं ग्रन्थः॥

मयूखसङ्ख्या-पृष्ठसङ्ख्यासमेत-चन्द्रालोककारिकाणामकारादिसूची

कारिका	म.सं.	पृ.सं.
अक्रमातिशयोक्तिश्चेद्	०५	१४
अगूढं कलयेदर्थान्तर	०८	२८
अङ्गभङ्गोल्लसल्लीला	०६	२५
अङ्गीकरोति यः काव्यम्	०१	०२
अतथ्यमारोपयितुम्	०५	१३
अत्यन्तातिशयोक्तिस्तु	०५	१४
अत्युक्तिरद्भुताऽतथ्य	०५	२१
अद्भुतो विस्मयस्थायी	०६	२४
अधिकं बोध्यमाधाराद्	०५	१८
अनुभावैः कटाक्षाद्यैः	०६	२३
अनुमानं च कार्यादेः	०५	१४
अनेकार्थस्य युग्मस्य	०५	१२
अनौचित्यं कीर्तिलताम्	०२	०६
अन्त्या द्विधेति विज्ञेया	०९	२९
अन्योन्यं नाम यत्र स्याद्	०५	१८
अपरस्य रसादेश्चेद्	०८	२८
अपराधीन इत्यादि	०२	०४
अपुष्टोऽर्थो विशेष्ये	०२	०५

कारिका	म.सं.	पृ.सं.
अप्रयुक्तं देवतादौ	०२	०३
अप्रस्तुतप्रशंसा स्यात्	०५	१७
अभवन्मतयोगः स्यान्न	०२	०५
अभिमानो विचारश्चेद्	०३	०८
अभीष्टविप्रयोगाऽश्रु	०६	२३
अमतार्थान्तरं मुख्ये	०२	०५
अमृतं सूक्तमित्यादौ	०९	२९
अयं प्रमत्तमधुपः	०५	१३
अर्थश्लेषोऽर्थमात्रस्य	०५	१६
अर्थापत्तिः स्वयं सिध्येत्	०५	१४
अर्धान्तरपदापेक्षि	०२	०५
अलङ्कारः परिकरः	०५	१४
अलङ्कारप्रकारेषु	०५	२२
अलङ्कारेषु तथ्येषु	०५	२२
अल्पाक्षरा विचित्रार्थ	०३	०८
अवज्ञा वर्ण्यते वस्तु	०५	२०
अविमृष्टविधेयांशः	०२	०४
अविवक्षितवाच्यस्य	०७	२६
अव्यक्तयोगनिर्योग	०१	०२
अश्लीलं त्रिविधं व्रीडा	०२	०३

कारिका	म.सं.	पृ.सं.
असम्भवोऽर्थनिष्पत्तौ	०५	१७
असुन्दरं यदि व्यङ्ग्यम्	०८	२८
अस्फुटं चार्थनिष्ठत्वात्	०९	२९
अस्फुटं स्तनयोरत्र	०८	२८
आक्षेपस्तु प्रयुक्तस्य	०५	१७
आख्याते भिन्नदेशत्वे	०५	१८
आचतुष्टयमासप्त	०६	२४
आलम्बनोद्दीपनात्मा	०६	२३
आवृत्तवर्णसम्पूर्णम्	०५	११
आवृत्तवर्णस्तबकं	०५	११
आवृत्ते दीपकपदे	०५	१५
इत्यादिलक्षणं भूरि	०३	०९
इत्येवं बोद्धृवैचित्र्याद्	०७	२७
इवादिकपदाभावे	०५	१३
उक्तिर्व्याजस्तुतिर्निन्दा	०५	१७
उच्चैरस्यति मन्दतामरसताम्	०१	०१
उत्प्रेक्षोन्नीयते यत्र	०५	१३
उत्साहाख्यस्थायिभावः	०६	२३
उदात्तमृद्धिश्चरितं	०५	२१
उदारता तु वैदग्ध्य	०४	१०

कारिका	म.सं.	पृ.सं.
उदारसारश्चेद्धाति..	०५	१९
उपमा यत्र सादृश्य	०५	१२
उपमाने च लीलादि	०५	१२
उपमानोपमेयत्वे..	०५	१२
उपमेयोपमानादौ	०५	११
उपादानार्पणद्वारे..	०९	३०
उल्लसत्तनुतां नीते..	०४	०९
उल्लासोऽन्यमहिम्ना चेद्..	०५	२०
एकं मे चुम्बनं देहि..	०२	०६
ओजः स्यात्प्रौढिरर्थस्य	०४	०९
कथितं पुनरुक्ता वाक्	०२	०४
कमलैः कमलावासैः..	०५	१७
कश्चित्साधारणः कश्चिद्	०७	२७
कष्टः स्पष्टावबोधार्थ	०२	०५
कस्याप्यतिशयस्योक्तिः	०५	२२
काकुत्स्थं प्रणतोऽम्भोधिः	०८	२८
कामिनीव भवत्खड्ग..	०५	११
कार्यं फलोपलम्भश्चेद्..	०३	०८
कार्यकारणभावाच्च..	०९	३०
कार्याद्यैः प्रस्तुतैरुक्ते..	०५	१७

कारिका	म.सं.	पृ.सं.
काव्यवित्प्रवरैश्चित्रम्..	०५	११
काव्ये नाट्ये च कार्ये च..	०६	२३
कैतवं व्यज्यमानत्वे..	०५	१३
क्रोधस्थायी रसो रौद्रो..	०६	२३
क्लिष्टमर्थो यदीयोऽर्थ..	०२	०४
क्षीरनीरधिराकाश..	०१	०२
खण्डश्लेषः पदानां चेद्..	०५	१६
गलद्वेद्यान्तरोद्भेदम्..	०६	२३
गुम्फः कारणमाला स्याद्..	०५	१८
गूढाक्षेपो विधौ व्यक्ते..	०५	१७
गृहीतमुक्तरीत्यर्थ..	०५	१९
गौः शुक्लः पाचको दण्डी..	१०	३१
गौणं सारोपमुद्दिष्टम्..	०९	३०
चत्वारो वस्त्वलङ्कारम्..	०७	२६
चपलातिशयोक्तिस्तु..	०५	१४
चेद् बिम्बप्रतिबिम्बत्वे..	०५	१६
छेकापह्नुतिरन्यस्य..	०५	१३
जयन्ति याज्ञिकश्रीमन्..	१०	३१
जात्या गुणेन क्रियया..	१०	३१
तं पूर्वाचार्यसूर्योक्ति..	०१	०१

कारिका	म.सं.	पृ.सं.
तथा वाच्यस्य सिद्ध्यङ्गम्......................................	०८	२८
तथा सहेतुरतया..	०९	३०
तद्गुणः स्वगुणत्यागे..	०५	२०
तन्मिश्रोऽन्योन्यसामान्य्..	०१	०२
तव दुग्धाब्धिसम्भूते	०२	०६
तिलकाद्यमिव स्त्रीणाम्...	०४	१०
तुल्यप्राधान्यमिन्दुत्वम्	०८	२८
त्रासश्चैव वितर्कश्च..	०६	२४
त्रिधा शब्दार्थतद्युग्म...	०७	२६
दधार गौरी हृदये	०२	०७
दीपकैकावलीयोगात्..	०५	१९
दीपमुद्योतयेद्यावत्..	०५	१५
दीपमुद्योतयेद्यावत्..	०५	१५
दुष्क्रमग्रामसन्दिग्धाः...	०२	०५
दृष्टाऽन्तश्चेद्भवन्मूर्तिः	०५	१६
देशात्मविप्रकृष्टस्य	०५	२१
दोषमापतितं स्वान्ते..	०२	०६
दोषे गुणत्वं तनुते	०२	०६
द्वात्रिंशद् द्वादशैकः षट्	०७	२७
द्विषां सम्पदमाच्छिद्य	०२	०५

कारिका	म.सं.	पृ.सं.
द्वौ विवक्षितवाच्यस्य	०७	२६
द्वौ स्तः सहचराऽचारु	०२	०६
धत्ते नभस्तलं भास्वान्	०२	०३
धर्मं कञ्चित् पुरस्कृत्य	१०	३१
धूमवत्त्वादिति यथा	०१	०२
न योगादेरायतनम्	१०	३१
नानाप्रभेदा नियताः	०७	२७
नाशङ्कनीयं पूर्वेषाम्	०१	०१
निरर्थकं तु हीत्यादि	०२	०३
निरुक्तं स्यान्निर्वचनम्	०३	०८
निर्दोषा लक्षणवती	०१	०१
निर्वेदग्लानिशङ्काख्यः	०६	२४
निर्वेदस्थायिकः शान्तः	०६	२४
नेयार्थं लक्षणाऽत्यन्त	०२	०४
न्यस्तेयं पश्य कन्दर्प	०२	०६
न्यूनं त्वत्खड्गसम्भूत	०२	०४
पतत्प्रकर्षं त्यक्तानु	०२	०४
पदे पदांशे वाक्यांशे	०२	०६
परिणामोऽनयोर्यस्मिन्	०५	१३
परिवृत्तिर्विनिमयो	०५	१९

कारिका	म.सं.	पृ.सं.
परिसङ्ख्या निषिध्यैकम्..	०५	१९
पर्यस्तापह्नुतिर्यत्र	०५	१३
पर्यायश्चेदनेकत्र	०५	१९
पर्यायेण द्वयोस्तच्चेद्	०५	१२
पाञ्चालिकी च लाटीया..	०६	२५
पिहितं परवृत्तान्तज्ञातुः..	०५	२०
पीयूषवर्षप्रभवम्	१०	३१
पुनः स्वगुणसम्प्राप्तिः..	०५	२०
पुनरुक्तप्रतीकाशम्..	०५	११
पृथक्कथितसादृश्यम्...	०५	१२
प्रतिमैव श्रुताभ्यास	०१	०१
प्रतिषेधः प्रसिद्धानाम्	०३	०८
प्रतीपमुपमानस्य	०५	२०
प्रत्यनीकं बलवतः...	०५	२०
प्रदीपं वर्धयेत्यत्र	०९	२९
प्रबन्धे चेति षोढाऽसौ	०७	२६
प्रश्नोत्तरं क्रमेणोक्तौ	०५	२०
प्रस्तुताप्रस्तुतानां च	०५	१५
प्राक्सिद्धिः स्वगुणोत्कर्षः	०५	२०
प्रौढोक्तिस्तदशक्तस्य..	०५	१५

कारिका	म.सं.	पृ.सं.
बहुभिर्बहुधोल्लेखाद्	०५	१३
ब्रह्माण्डं त्वद्यशःपूर	०२	०५
भग्नप्रक्रममारब्ध	०२	०५
भङ्गश्लेषः पदस्तोम	०५	१६
भवन्तमथवा दोषं	०२	०६
भवेच्छ्रुतिकटुर्वर्णः	०२	०३
भवेदर्थान्तरन्यासः	०५	१७
भावस्य शान्तिरुदयः	०६	२४
भावानामुदयः सन्धिः	०५	२१
भाविकं भूतभाव्यर्थ	०५	२१
भूतादिकालभेदेन	०७	२७
भूयसामेकसम्बन्ध	०५	१९
भेदकातिशयोक्तिस्तु	०५	१५
भ्रान्तापह्नुतिरन्यस्य	०५	१३
मधुरायां समाक्रान्ता	०६	२५
महादेवः सत्रप्रमुख	०१	०२
महादेवः सत्रप्रमुख	०२	०७
महादेवः सत्रप्रमुख	०३	०९
महादेवः सत्रप्रमुख	०४	१०
महादेवः सत्रप्रमुख	०५	२२

कारिका	म.सं.	पृ.सं.
महादेवः सत्रप्रमुख	०६	२५
महादेवः सत्रप्रमुख	०७	२७
महादेवः सत्रप्रमुख	०८	२९
महादेवः सत्रप्रमुख	०९	३०
महादेवः सत्रप्रमुख	१०	३१
माधुर्यं पुनरुक्तस्य	०४	०९
माला परम्परा चैषाम्	०५	२२
मिथः पृथग्वाक्यपदैः	०२	०५
मीलितं बहुसादृश्याद्	०५	१४
मुखं चन्द्रश्रियं धत्ते	०२	०६
मुख्यार्थस्याविवक्षायाम्	०९	२९
मौक्तिकं चेल्लतां सूते	०५	१५
यत्रोपमानचित्रेण	०५	१२
यथासङ्ख्यं द्विधाथाश्चेत्	०५	१९
यद्वस्तुनोऽन्यथारूपं	०५	२०
यद्व्यज्यमानं मनसः	०८	२८
यस्मादन्तः स्थितः सर्वः	०४	०९
यस्मिन् विशेषसामान्य	०५	१७
यस्मिन्नुपहतो लुप्तो	०२	०४
युक्तार्थानां तां च विना	०१	०२

कारिका	म.सं.	पृ.सं.
युक्तिर्विशेषसिद्धिश्चेद्....................................	०३	०८
युक्त्यास्वाद्यलसद्रसैकवसतिः	०१	०१
ये षोडशाद्या द्विगुणाः	०७	२७
रतिर्देवादिविषया....................................	०६	२४
रत्याख्यस्थायिभावात्मा....................................	०६	२३
रसभावतदाभास	०५	२१
रसाद्यनुचिते वर्णे....................................	०२	०४
रूपकातिशयोक्तिस्तु	०५	१५
रेफाक्रान्ता वर्ग्ययणाः	०६	२५
लकारोऽन्यैरसंयुक्तो	०६	२५
लक्षकस्थं स्फुटं यत्र	०९	२९
लक्षणीयस्य शब्दस्य....................................	०९	२९
लक्ष्यलक्षकवैशिष्ट्य	०९	३०
लाटानुप्रासभूर्भिन्न	०५	११
वक्तुः कविनिबद्धस्य	०७	२६
वक्तृस्यूतं बोधयितुम्....................................	०७	२७
वक्रोक्तिः श्लेषकाकुभ्याम्....................................	०५	२१
वस्त्वलङ्कारयोर्व्यक्तिः	०७	२६
वाक्ययोरर्थसामान्ये	०५	१६
वाक्यार्थयोः सदृशयोः....................................	०५	१६

कारिका	म.सं.	पृ.सं.
विकल्पस्तुल्यबलयोः	०५	१९
विख्यातस्योपमानस्य	०५	१२
विचित्रं चेत्प्रयत्नः स्याद्	०५	१८
विनोक्तिश्चेद्विना किञ्चित्	०५	१६
विभक्त्युत्पत्तये योग्यः	०१	०२
विभावना विनापि स्यात्	०५	१८
विरोधोऽनुपपत्तिश्चेद्	०५	१७
विशेषः ख्यातमाधारम्	०५	१८
विशेषोक्तिरनुत्पत्तिः	०५	१८
विषमं यद्यनौचित्याद्	०५	१८
वीप्सोत्सर्पन्मुखाग्रार्द्रम्	०६	२५
वृत्तिभेदैस्त्रिभिर्युक्ता	०७	२६
वैचित्र्यलक्षणं व्यासो	०४	१०
व्यक्त एव क्वचिद् व्यङ्ग्यः	०८	२८
व्यतिरेको विशेषश्चेद्	०५	१६
व्यनक्त्यनुचितार्थं	०२	०३
व्याघ्रादिभिर्विभावैस्तु	०६	२३
व्याजोक्तिः शङ्कमानस्य	०५	२१
व्रीडा चपलता हर्षः	०६	२४
शब्दार्थयोः प्रसिद्ध्या वा	०५	११

कारिका	म.सं.	पृ.सं.
शब्दार्थोभयभूरेकः	०७	२६
शब्दे पदार्थे वाक्यार्थे	०९	३०
शब्दे परार्थे वाक्यार्थे	०५	२२
शिथिलं शयने लिल्ये	०२	०३
शुद्धं सारोपमुद्दिष्टम्	०९	३०
शुद्धतन्मूलसम्भिन्न	०१	०२
शुद्धिरेकप्रधानत्वं	०५	२१
शृङ्गारे च प्रसादे च	०४	१०
शोभा ख्यातोऽपि	०३	०८
श्लेषादिभूर्विरोधश्चेद्	०५	१७
श्लेषो विघटमानार्थ	०४	०९
श्लोकस्यार्धे तदर्धे वा	०५	११
स हन्ति हन्त कान्तारे	०२	०३
सङ्कुचन्ति सरोजानि	०५	१५
सङ्गताऽन्यगुणानङ्गी	०५	२०
सन्दिग्धं यदि सन्देहो	०८	२८
समताऽल्पसमानत्वम्	०४	०९
सममौचित्यतोऽनेक	०५	१८
समाधिः कार्यसौकर्यम्	०५	१९
समाधिरर्थमहिमा	०४	०९

कारिका	म.सं.	पृ.सं.
समानधर्मयुक्साध्य	०५	१२
समाप्तपुनरात्तं स्याद्	०२	०४
समासोक्तिः परिस्फूर्तिः	०५	१६
सम्बन्धातिशयोक्तिस्तु	०५	१५
सम्भावनं यदीत्थं स्याद्	०५	१५
सरोजनेत्र पुत्रस्य	०२	०६
सर्वसाधारणप्रेम	०६	२४
सर्वेषां च प्रतिद्वन्द्व	०५	२१
सर्वैरूर्ध्वैः सकारस्य	०६	२५
सहस्रपत्रामित्रं ते	०२	०५
सहोक्तिः सहभावश्चेद्	०५	१६
सादृश्यात् समवायात् सा	०९	३०
साभिप्राये विशेष्ये तु	०५	१४
सामान्यं यदि सादृश्याद्	०५	१४
सामान्यपरिवृत्तिः स्यात्	०२	०६
साम्मुख्यं विदधानायाः	०७	२६
सारो नाम पदोत्कर्षः	०५	१९
सिद्धिः ख्यातेषु चेन्नाम	०३	०८
सुप्तं विबोधाऽमर्षश्च	०६	२४
सौकुमार्यमपारुष्यम्	०४	१०

कारिका	म.सं.	पृ.सं.
स्थायी जुगुप्सा वीभत्सो	०६	२४
स्फुटाऽस्फुटप्रभेदेन	०९	२९
स्याच्चेतो विशता येन	०२	०३
स्यात्काव्यलिङ्गम्	०५	१४
स्यात्सम्पूर्णोपमा यत्र	०५	१२
स्यात्स्मृतिभ्रान्तिसन्देहैः	०५	१३
स्यादङ्गयष्टिरित्येवम्	०५	१२
स्याद् द्व्यर्थमिह सन्दिग्धं	०२	०३
स्याद् व्याघातोऽयथाकारि	०५	१८
स्यान्मिथ्याध्यवसायः	०३	०८
स्वभावोक्तिः स्वभावस्य	०५	२१
स्वरव्यञ्जनसन्दोह	०५	११
हंहो चिन्मयचित्तचन्द्रमणयः	०१	०१
हतवृत्तमनुक्तोऽपि	०२	०४
हासस्थायी रसो हास्यो	०६	२३
हेतुस्त्यक्त्वा बहूनर्थान्	०३	०८
हेतोः कुतोऽपि वैशिष्ट्यात्	०५	१४